श्री मातंगी कवचं (सुमुखी कवचं)

श्री मातंगी कवचं (सुमुखी कवचं)

श्रीपार्वत्युवाच |
देवदेव महादेव सृष्टिसंहारकारक |
मातंग्याः कवचं ब्रूहि यदि स्नेहोऽस्ति ते मयि || 1 ||

शिव उवाच |
अत्यंतगोपनं गुह्यं कवचं सर्वकामदं |
तव प्रीत्या मयाऽऽख्यातं नान्येषु कथ्यते शुभे || 2 ||

शपथं कुरु मे देवि यदि किंचित्प्रकाशसे |
अनया सदृशी विद्या न भूता न भविष्यति || 3 ||

ध्यानं |
शवासनां रक्तवस्त्रां युवतीं सर्वसिद्धिदां |
एवं ध्यात्वा महादेवीं पठेत्कवचमुत्तमं || 4 ||

कवचं |
उच्छिष्टं रक्षतु शिरः शिखां चंडालिनी ततः |
सुमुखी कवचं रक्षेद्देवी रक्षतु चक्षुषी || 5 ||

महापिशाचिनी पायान्नासिकां ह्रीं सदाऽवतु |
ठः पातु कंठदेशं मे ठः पातु हृदयं तथा || 6 ||

ठो भुजौ बाहुमूले च सदा रक्षतु चंडिका |
ऐं च रक्षतु पादौ मे सौः कुक्षिं सर्वतः शिवा || 7 ||

ऐं ह्रीं कटिदेशं च आं ह्रीं संधिषु सर्वदा |
ज्येष्ठमातंग्यंगुलीर्मे अंगुल्यग्रे नमामि च || 8 ||

उच्छिष्टचांडालि मां पातु त्रैलोक्यस्य वशंकरी |
शिवे स्वाहा शरीरं मे सर्वसौभाग्यदायिनी || 9 ||

उच्छिष्टचांडालि मातंगि सर्ववशंकरि नमः |
स्वाहा स्तनद्वयं पातु सर्वशत्रुविनाशिनी || 10 ||

अत्यंतगोपनं देवि देवैरपि सुदुर्लभं |
भ्रष्टेभ्यः साधकेभ्योऽपि द्रष्टव्यं न कदाचन || 11 ||

दत्तेन सिद्धिहानिः स्यात्सर्वथा न प्रकाश्यतां |
उच्छिष्टेन बलिं दत्वा शनौ वा मंगले निशि || 12 ||

रजस्वलाभगं स्पृष्ट्वा जपेन्मंत्रं च साधकः |
रजस्वलाया वस्त्रेण होमं कुर्यात्सदा सुधीः || 13 ||

सिद्धविद्या इतो नास्ति नियमो नास्ति कश्चन |
अष्टसहस्रं जपेन्मंत्रं दशांशं हवनादिकं || 14 ||

भूर्जपत्रे लिखित्वा च रक्तसूत्रेण वेष्टयेत् |
प्राणप्रतिष्ठामंत्रेण जीवन्यासं समाचरेत् || 15 ||

स्वर्णमध्ये तु संस्थाप्य धारयेद्दक्षिणे करे |
सर्वसिद्धिर्भवेत्तस्य अचिरात्पुत्रवान्भवेत् || 16 ||

स्त्रीभिर्वामकरे धार्यं बहुपुत्रा भवेत्तदा |
वंध्या वा काकवंध्या वा मृतवत्सा च सांगना || 17 ||

जीवद्वत्सा भवेत्सापि समृद्धिर्भवति ध्रुवं |
शक्तिपूजां सदा कुर्याच्छिवाबलिं प्रदापयेत् || 18 ||

इदं कवचमज्ञात्वा मातंगी यो जपेत्सदा |
तस्य सिद्धिर्न भवति पुरश्चरणलक्षतः || 19 ||

इति श्रीरुद्रयामलतंत्रे मातंगी सुमुखी कवचं |